# अमृतबिन्दु उपनिषद

# अमृतबिन्दु उपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शांतिः । शांतिः । शांतिः ॥

## ॥ अथ अमृतबिन्दु उपनिषत् ॥

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥१॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय पिष्यासक्तं मुक्तंये निर्विषयं स्मृतम् ॥२॥

यतो निर्विष्यस्यास्य मनसो मुक्तिरिष्यते ।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥३॥

निरस्तनिषयासङ्गं संनिरुद्धं मनो हृदि ।
यदाऽऽयात्यात्मनो भावं तदा तत्परमं पदम् ॥४॥

तावदेव निरोद्धव्यं यावद्धृति गतं क्षयम् ।
एतज्ज्ञानं च ध्यानं च शेषो न्यायश्च विस्तरः ॥५॥

नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च ।
पक्षपातविनिर्मुक्तं ब्रह्म संपद्यते तदा ॥६॥

स्वरेण संधयेद्योगमस्वरं भावयेत्परम् ।
अस्वरेणानुभावेन नाभावो भाव इष्यते ॥७॥

तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तदब्रह्मामिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥८॥

निर्विकल्पमनन्तं च हेतुद्याष्टान्तवर्जितम् ।
अप्रमेयमनादिं च यज्ञात्वा मुच्यते बुधः ॥९॥

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥१०॥

एक एवाऽऽत्मा मन्थव्यो जाग्रत्स्वप्नसुषुप्तिषु ।
स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥११॥

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृष्यते जलचन्द्रवत् ॥१२॥

घटसंवृतमाकाशं नीयमानो घटे यथा ।
घटो नीयेत नाऽकाशः तद्वाज्जीवो नभोपमः ॥१३॥

घटवद्विविधाकारं भिद्यमानं पुनः पुनः ।
तद्भेदे न च जानाति स जानाति च नित्यशः ॥१४॥

शब्दमायावृतो नैव तमसा याति पुष्करे ।
भिन्नो तमसि चैकत्वमेक एवानुपश्यति ॥१५॥

शब्दाक्षरं परं ब्रह्म तस्मिन्क्षीणे यदक्षरम् ।
तद्विद्वानक्षरं ध्यायेच्चद्यदीच्छेच्छान्तिमात्मनः ॥१६॥

द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् ।

शब्दब्रह्माणि निष्णातः परं ब्रह्माधिगच्छति ॥१७॥

ग्रन्थमभ्यस्य मेधावी ज्ञानवीज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥१८॥

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।
क्षीरवत्पष्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥१९॥

धृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम् ।
सततं मनसि मन्थयितव्यं मनु मन्थानभूतेन ॥२०॥

ज्ञाननेत्रं समाधाय चोद्धरेद्वह्निगवत्परम् ।
निष्कलं निश्चलं शान्तं तद्ब्रह्माहमिति स्मृतम् ॥२१॥

सर्वभूताधिवासं यद्भूतेषु च वसत्यपि ।
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः ॥२२॥

**॥ इति अथर्ववेदे अमृतबिन्दु उपनिषत् समाप्त ॥**

☼ ☼ ☼ ☼ ☼

## शांतिपाठ

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शांतिः । शांतिः । शांतिः ॥

☼ ☼ ☼ ☼ ☼